# श्री काली स्तोत्रं

## परशुराम उवाच

नम: शंकरकान्तायै सारायै ते नमो नम: |
नमो दुर्गतिनाशिन्यै मायायै ते नमो नम: || १ ||

नमो नमो जगाद्धात्र्यी जगत्कर्यै नमो नम: |
नमोऽस्तु ते जगन्मात्रे कारणायै नमो नम: || २ ||

प्रसीद जगतां मात: सृष्टिसंहार कारिणि |
त्वत्पादे शरणं यामि प्रतिज्ञां सार्थिकां कुरु || ३ ||

त्वयि मे विमुखायां च को मां रक्षितुमीश्वर: |
त्वं प्रसन्ना भव शुभे मां भक्तं भक्तवत्सले || ४ ||

युष्माभि: शिवलोके च मह्यं दत्तो वर: पुरा |
तं वरं सफलं कर्तुं त्वमर्हसि वरानने || ५ ||

जामदग्न्यस्तवं श्रुत्वा प्रसन्ना भव दम्बिका |
मा भैरित्येव मुक्त्वा तु तत्रैवान्तर धीयत || ६ ||

एतद् भृगुकृतं स्तोत्रं भक्तियुक्तश्च य: पठेत् |
महाभयात् समुत्तीर्ण: स भवेदवलीलया || ७ ||

स पूजितश्च त्रैलोक्ये त्रैलोक्य विजयी भवेत् |
ज्ञानिश्रेष्ठो भवेच्चैव वैरिपक्षविमर्दक: || ८ ||

**इति श्री परशुराम कृत श्री कालिका स्तोत्र सम्पूर्णं**





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133